बन्धः । इति हेमचन्द्रः ॥ (स्वार्थे कन् । कलापार्थः । स्त्री, यस्मिन् काले मयूराः कलापिनो भवन्ति स उपचारात् कलापी तत्र देयमृणम् । "कलाप्यश्वत्थयववुसाद्वुन्" । ४ । ३ । ४८ । ऋणविशेषः । इति सिद्धान्तकौमुदी ॥ पद्यविशेषः । यथा, साहित्यदर्पणे ६ । ३४७ ।

"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम् ।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते ।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं स्मृतम्" ॥)

कलापिनी, स्त्री, (कलापश्चन्द्रः अस्ति अस्याम् । कलाप + मत्वर्थे इनिः + ततो ङीप् ।) रात्रिः । नागरमुस्ता । इति राजनिर्घण्टः ॥

कलापी, [न्] पुं, (कलापाः फलपत्रसमूहाः सन्त्यस्मिन् । कलाप + इनिः ।) प्लक्षवृक्षः । (कलापो बर्हः अस्ति अस्य इनिः ।) मयूरः । इति मेदिनी ॥ (यथा रघुः ६ । ९ ।

"पुरोपकण्ठोपवनाश्रयाणां
कलापिनामुद्धतनृत्यहेतौ" ॥)

कोकिलः । इति धरणी ॥ (त्रि, तूणवान् । कलापव्याकरणाध्यायी ॥)

कलापूर्णः, पुं, (कलाभिः पूर्णः ।) चन्द्रः । इति शब्दचन्द्रिका ॥ (त्रि, कलापरिपूर्णः । यथा महाभारते । ४ । ६७ । १२ ।

"सदा भवान् फाल्गुनस्य गुणैरस्मान् विकत्थते ।
न चार्ज्जुनः कलापूर्णो मम दुर्य्योधनस्य वा" ॥)

कलाभृत्, पुं, (कलां बिभर्त्ति । कला + भृ + क्विप् । तुगागमश्च ।) चन्द्रः । इति हेमचन्द्रः ॥ (कलां गीतादिकं बिभर्त्तीति । गीतादिकलाभिज्ञे वाच्यलिङ्गत्वम् । यथा मनुः २ । १३४ ॥

"दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ।
त्र्यब्दपूर्ब्बं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु" ॥)

कलामकः, पुं, (कलम + कनि पृषोदरात् साधुः ।) कलमधान्यम् । इति हेमचन्द्रः ॥ (कलमशब्देऽस्य विशेषो ज्ञातव्यः ॥)

कलाम्बिका, स्त्री, (कला अर्थः विकायते प्रयुज्यते अस्याम् । कला + वि + कै + क + टाप् । पृषोदरादित्वात् मुमि साधुः ।) अर्थानां प्रयोगः । ऋणदानम् । इति त्रिकाण्डशेषः ॥ धार देओया इति भाषा ॥

कलायः, पुं, (कलां अयते । "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) शमीधान्यविशेषः । मटर वाँटुला इति भाषा । तत्पर्य्यायः । सतीलकः २ हरेणुः ३ खण्डिकः ४ । इत्यमरः । २ । ९ । १६ ॥ त्रिपुटः ५ अतिवर्त्तुलः ६ । इति रत्नमाला ॥ मुण्डचणकः ७ शमनः ८ नीलकः ९ कण्टी १० सतीलः ११ हरेणुकः १२ सतीनः १३ सतीनकः १४ । (यथा, माघः । १३ । २१ । "विकसत्कलायकुसुमासितद्युतेः" ॥) अस्य गुणाः । वातरुचिपुष्ट्यामदोषकारित्वम् । पित्तदाहकफनाशित्वम् । शीतत्वम् । कषायत्वञ्च ॥ (अस्य पर्य्यायो गुणाश्च यथा, भावप्रकाशस्य पूर्ब्बखण्डे धान्यवर्गे ।

"कलायो वर्त्तुलः प्रोक्तः सतिलश्च हरेणुकः ।
कलायो मधुरः स्वादुःपाके रूक्षश्च वातलः" ॥)

अस्य शाकगुणाः । मधुरत्वम् । पित्तश्लेष्महरत्वम् । गुरुत्वम् । कषायानुरसत्वम् । रूक्षत्वम् । मलभेदित्वम् । वायुकोपनत्वञ्च । इति राजनिर्घण्टः ॥ ("भेदनं मधुरं रूक्षं कषायमतिवातलम्" ॥ इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)

कलायनः, पुं, (कलानां नृत्यगीतादीनां अयनं प्राप्तिर्यत्र ।) नर्त्तकः । इति शब्दरत्नावली ॥

कलाया, स्त्री, (कलाय + स्त्रियां टाप् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥ (गण्डदूर्व्वाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

कलालापः, पुं, (कलं मधुरास्फुटं आलपतीति । कल + आ + लप् + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) भ्रमरः । इति राजनिर्घण्टः ॥ (मधुरालापकर्त्तरि त्रि ॥)

कलावती, स्त्री, (कला गान्धर्व्वकलाः संगीतरागालापादयः सन्ति अस्याम् । कला + मतुप् मस्य वः स्त्रियां ङीप् ।) तुम्बुरुगन्धर्व्वस्य वीणा । इति हेमचन्द्रः ॥ (यथा माघस्य १ । १० श्लोकस्य टीकायां मल्लिनाथधृतवैजयन्तीवचनम् ।

"विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती ।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी" ॥)

स्वनामख्याता द्रुमिलस्य राज्ञः पत्नी । यथा ब्रह्मवैवर्त्ते ब्रह्मखण्डे । २० । १२ ।

"कान्यकुब्जे च देशे च द्रुमिलो नाम राजकः ।
कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता" ॥)

श्रीराधामाता । सा तु वृषभानुपत्नी । इति ब्रह्मवैवर्त्तपुराणम् ॥ अप्सरोविशेषः । यथा रतिस्तव कलावतीति श्लिष्टकाव्ये जयदेवः ।

(कलाः चतुःषष्टिकलाः विद्यन्ते यस्याः । गङ्गा । यथा, काशीखण्डे २९ । ४७ ।

"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥)

दीक्षाविशेषः । तस्याः क्रमो मन्त्रं विना लिख्यते । शिष्यः पूर्ब्बमुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्ब्बकं सङ्कल्पं कुर्य्यात् । ततो गुरुं वृणुयात् । अथ गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्य्यात् । तदर्घ्यजलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्य्यात् । ततो दक्षिणपादपुरःसरं द्वारवामशाखां स्पृशन् दक्षिणाङ्गं सङ्कोचयन् मण्डपान्तः प्रविश्य नैरृत्यां वास्तुपुरुषं ब्रह्माणञ्च संपूज्य देयमन्त्रेण दिव्यदृष्ट्यावलोकनेन दिव्यान् विघ्नानुत्सार्य्य अस्त्रमन्त्रेण जलेनान्तरीक्षगान् विघ्नानुत्सार्य्य वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य्य सप्तधास्त्रमन्त्राभिमन्त्रितविकिरानादाय भूतनिवारणार्थमन्त्रेण तान् विकिरेत् । तत आसनशुद्धिं कृत्वा मन्त्रेण स्वस्तिकादिक्रमेणोपविशेत् । उपविश्य वा विघ्नानुत्सारयेत् । ततः पञ्चगव्येन मूलेन मण्डपं शोधयेत् । ततः स्वदक्षिणे पूजाद्रव्याणि वामे सुवासिताम्बुपूर्णकुम्भं हस्तप्रक्षालनार्थं पात्रमेकं एकदेशे स्थापयेत् । सर्व्वदिक्षु घृतप्रदीपांश्च स्थापयित्वा पुटाञ्जलिर्भूत्वा वामे गुरुपरमगुरुपरापरगुरून् प्रणम्य दक्षिणे गणेशं मध्ये स्वेष्टदेवताञ्च प्रणम्य अस्त्रमन्त्रेण गन्धपुष्पाभ्यां करौ संशोध्य ऊर्द्ध्वोर्द्ध्वतालत्रयं दत्त्वा छोटिकाभिर्दशदिग्बन्धनं कृत्वा वह्निबीजेन जलधारया वह्निप्राकारं विचिन्त्य भूतशुद्धिं कुर्य्यात् । ततो मातृकान्यासः प्राणायामः पीठन्यासः ऋष्यादिन्यासः मन्त्रन्यासः । ततो मुद्रां प्रदर्श्य ध्यानं मानसपूजां अर्घ्यस्थापनञ्च कुर्य्यात् । ततोऽर्घ्यपात्रात् किञ्चित् जलं प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं पूजोपकरणञ्च मूलेन त्रिरभ्युक्ष्य पीठमन्त्रेण शरीरे धर्म्मादीन् पूजयेत् । ततो हृत्पद्मस्य पूर्ब्बादिकेशरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं यजेत । तत्र हृदये मूलदेवतां नैवेद्यं विना गन्धाद्यैः पूजयेत् । तत उत्तमाङ्गहृदयमूलाधारपादसर्व्वाङ्गेषु मूलेन पञ्च पुष्पाञ्जलीन् दत्त्वा यथाशक्ति मन्त्रं जप्त्वा जपं समर्पयेत् । सर्व्वमेतत् प्रोक्षणीपात्रस्थवारिणा विदध्यात् । ततः प्रोक्षणीस्तोयं विसृज्य पूर्ब्बवदापूर्य्य वहिःपूजामारभेत । तत्र शारदोक्तसर्व्वतोभद्रमण्डलाद्यन्यतममण्डलं विधाय तत्र घटं संस्थाप्य मण्डलं संपूज्य शालिभिः कर्णिकामापूर्य्य तदुपरि तण्डुलानास्तीर्य्य तेषु दर्भानास्तीर्य्य विष्टरं चाक्षतसंयुक्तं तदुपरि न्यसेत् । ततो मण्डले पीठोक्तदेवताः पूजयेत् । ततो मण्डले प्रादक्षिण्येन वह्नेर्दशकला विन्यस्य पूजयेत् । ततो हेमादिरचितं कुम्भं अस्त्रमन्त्रेण प्रक्षाल्य चन्दनागुरुकर्पूरैर्धूपयित्वा त्रिगुणतन्तुना संवेष्ट्य कुम्भं संपूज्य तत्र विष्टराक्षतं नवरत्नानि च प्रक्षिप्य प्रणवमुच्चरन् कुम्भपीठयोरैक्यं विभाव्य पीठे स्थापयेत् । कुम्भे प्रादक्षिण्येन सूर्य्यस्य द्वादशकला विन्यस्य संपूजयेत् । ततः क्षीरिद्रुमकषायेण पञ्चाशत्कम्भवेन वा तीर्थजलैर्व्वा सुवासितजलैर्व्वा आत्माभेदेन मातृकां मन्त्रञ्च प्रतिलोमतो जपन् पूरयेत् कुम्भं देवताधिया । ततश्चन्द्रस्यामृतादिषोडशकला जले प्रादक्षिण्येन विचिन्त्य मन्त्रेण संपूज्य शङ्खान्तरं क्षीरिद्रुमकषायादिद्रव्येणापूर्य्य गन्धाष्टकं विलोड्य तस्मिन् जले सकलाः कला आवाह्य पूजयेत् । तत्रादौ वह्नेर्दशकलाः पूजयेत् । ततो मूलमन्त्रं प्रतिलोमेन जपन् मन्त्रस्य देवतां मनसा ध्यायन् आसां प्राणप्रतिष्ठां कृत्वा गन्धादिभिः पूजयेत् । ततः प्रत्येकेन पूजयेत् । ततः सूर्य्यस्य तपिन्यादिद्वादशकलाः आवाहनादिकं कृत्वा संपूज्य प्रत्येकं पूजयेत् । ततश्चन्द्रस्यामृतादिषोडशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततः पञ्चाशत्कलाः पूजयेत् । यथा सृष्ट्यादिकचवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा पूर्ब्बवत् संपूज्य प्रत्येकेन पूजयेत् । ततो जरादिटतवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततस्तीक्ष्णादिपयवर्गदशकलाः प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततः पीतादिषवर्गपञ्चकलाः (षं-सं-हं-क्षं) प्राणप्रतिष्ठादिकं कृत्वा संपूज्य प्रत्येकेन पूजयेत् । ततो निवृत्त्यादिअवर्गषोड़कलाः प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् । शक्तश्चेत् प्रत्येकमावाह्य पाद्यादिभिः पूजयेत् ।